दीर्घकन्धरा ९ धर्म्मान्ता १० कामुकी ११ श्वेता १२ मेघानन्दा १३ जलाश्रया १४। बलेन शक्त्या दूरमूर्द्धमकति। वल वक्र संवरणे बलाकादयश्चेत्याकन् बलाका। इति रायमुकुटकृतव्युत्पत्तिद्वयेन पवर्गीयबकारादिरन्त्यवकारादिश्चायं शब्दः॥*॥ अस्या मांसगुणाः। वायुनाशित्वम्। स्निग्धत्वम्। स्वच्छमलत्वम्। वृष्यत्वम्। कफपित्तहरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ सारसहंसबलाकाचक्रक्रौञ्चादयो जले प्लवनात् प्लवसंज्ञाः कथितास्ते तन्मांसं गुरूष्णञ्च बलदायि। अपि च।

"अन्ये वकबलाकाद्या गुरवः प्राणिभक्षणात्।"

इति राजनिर्घण्टः॥

अन्यच्च।

"हंससारसकाचाक्षबकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"

इति भावप्रकाशः॥

(कामुकी। इति शाश्वतः॥)

बलाञ्चिता, स्त्री, (बलेन अञ्चिता।) रामवीणा। इति शब्दरत्नावली॥

बलाटः, पुं, (बलेन अट्यते प्राप्यते इति। अट्+घञ्।) मुद्गः। इति हेमचन्द्रः॥

बलात्, व्य, (बलमततीति। बल+अत्+क्विप्।) हठात्। बलादिति निपातो हठार्थे इति स्वामी। इत्यमरटीकायां भरतः॥ यथा,—

"बलात् संदूषयेद्यस्तु परभार्य्यां नरः क्वचित्।
वधदण्डो भवेत्तस्य नापराधो भवेत् स्त्रियाः॥"

इति मात्स्ये २०१ अध्यायः॥

बलात्कारः, पुं, (बलात्करणम्। बलात्+कृ+भावे घञ्।) हठात्करणम्। तत्पर्य्यायः। प्रसभम् २ हठः ३। इत्यमरः। २। ८। १०८॥ हठात्कारः ४ प्रसभः ५। इति शब्दरत्नावली॥

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथा॥"

इति ऋणादाने मिताक्षराधृतनारदवचनम्॥

(यथा, रघुः। १०। ४७।

"शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः॥")

बलात्मिका, स्त्री, (बलमेव आत्मा स्वरूपं यस्याः।) हस्तिशुण्डीवृक्षः। इति शब्दरत्नावली॥

बलाद्या, स्त्री, (बलाय आद्या श्रेष्ठा।) बला। इति राजनिर्घण्टः॥ (बलाशब्देऽस्या विवरणं ज्ञातव्यम्॥)

बलानुजः, पुं, (बलस्य बलरामस्य अनुजः कनिष्ठः।) श्रीकृष्णः। इति पुराणम्॥

बलामोटा, स्त्री, (बलमामोटयतीति। बल+आ+मुट्+अच्। टाप्।) नागदमनी। इति भावप्रकाशः॥ (यथास्या गुणाः।

"बलामोटा कटुस्तिक्ता लघुः पित्तकफापहा।
मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्द्दभान्॥
सर्व्वग्रहप्रशमनी निःशेषविषनाशिनी।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

बलायः, पुं, (अयतीति अयः प्रापकः। बलस्य अयः।) वरुणवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य वरुणशब्दे ज्ञातव्याः॥)

बलारातिः, पुं, (बलस्य तन्नाम्ना प्रसिद्धस्यासुरस्य अरातिः शत्रुः।) इन्द्रः। इत्यमरः। १। १। ४६॥

बलालकः, पुं, (बलाय अलति समर्थो भवतीति। बल+अल्+ण्वुल्।) पानीयामलकम्। इति शब्दचन्द्रिका॥

बलाशः, पुं, (बलमश्नातीति। बल+अश+अण्।) श्लेष्मा। इति हेमचन्द्रः। ३। १२६॥ (यथा,

"बलाश एवायतमुन्नतञ्च
शोफं करोत्यन्नगतिं निवार्य्य॥"

कण्ठगतरोगविशेषः। तल्लक्षणं यथा,—

"गले च शोफं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेतमाहु-
र्बलाशसंज्ञं निपुणा विकारम्॥"

इति सुश्रुते निदानस्थाने षोड़शेऽध्याये॥

दन्त्यसान्तोऽप्ययं शब्दो दृश्यते॥)

बलासमः, पुं, बुद्धः। इति त्रिकाण्डशेषः॥

ब(व)लाहकः, पुं, (बलेन हीयते इति। बल+हा+कुन्। यद्वा, वारीणां वाहकः। पृषोदरादित्वात् साधुः।) मेघः। (यथा, कुमारे। १। ४।

"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

मुस्तकः। इत्यमरः। १। ३। ६॥ पर्व्वतः। दैत्यविशेषः। नागविशेषः। इति मेदिनी॥ (यथा, महाभारते। २। ९। ९।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ॥"

बलाहकसर्पस्तु दर्व्वीकराणामन्तर्गतः। इति सुश्रुते कल्पस्थाने ४ अध्यायः॥) रमागर्भोद्भवः कल्किदेवपुत्त्रः। यथा,—

"तथा रमा सिते पक्षे वैशाखे द्वादशीदिने।
जामदग्न्याद्व्रतं चक्रे पूर्णं वर्षचतुष्टयम्॥
पट्टसूत्रं करे बद्धा भोजयित्वा द्विजान् बहून्॥
भुक्ता हविष्यं क्षीराक्तं सुमिष्टं स्वामिना सह॥
बुभुजे पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता।
सा पुत्त्रौ सुषुवे साध्वी मेघमालबलाहकौ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥"

इति कल्किपुराणे ३१ अध्यायः॥

श्रीकृष्णरथाश्वविशेषः। यथा,—

"स्यन्दनस्तु शतानन्दः सारथिश्चास्य दारुकः।
तुरङ्गाः शैव्यसुग्रीवमेघपुष्पबलाहकाः॥"

इति त्रिकाण्डशेषः॥

(यथाच भागवते। १०। ५३। ५।

"स चाश्वैः शैव्यसुग्रीवमेघपुष्पबलाहकैः।
युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः॥"

जयद्रथस्य भ्रातृविशेषः। यथा, महाभारते। ३। २५४। १२।

"जयद्रथो नाम यदि श्रुतस्ते
सौवीरराजः सुभगे! स एषः।
तस्यापरे भ्रातरोऽदीनसत्त्वा
बलाहकानीकविदारणाद्याः॥"

नदविशेषः। स तु लवणसमुद्रगामी। यथा, मात्स्ये। १२०। ७२।

"बलाहकश्च ऋषभश्चक्रो मैनाक एव च।
विनिविष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम्॥"

कुशद्वीपस्थपर्व्वतविशेषः। यथा, तत्रैव। १२१। ५५।

"बलाहकस्तृतीयस्तु जात्यञ्जनमयो गिरिः॥"

तारापीड़स्य राज्ञः स्वनामख्यातो बलाधिकारी। यथा, कादम्बर्य्यां चन्द्रापीड़विद्याभ्यासकथने। "चन्द्रापीड़मानेतुं राजा बलाधिकृतं बलाहकनामानं आहूय बहुतुरगबलपदातिपरिवृतमतिप्रशस्तेऽहनि प्राहिणोत्॥")

बलाक्ककन्दः, पुं, (बलं आक्कयतीति बलाक्कस्ताद्दशः कन्दः।) गुलञ्चकन्दः। इति राजनिर्घण्टः॥

बलिः, पुं, (बल्यते दीयते इति। बल दाने+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इतीन्।) करः। राजग्राह्यो भागः। (यथा, मनुः। ७। ८०।

"सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्॥"

"राजा शक्तैरमात्यैर्वर्षग्राह्यं धान्यादिभागमानयेत्।" इति कुल्लूकभट्टः॥) उपहारः। पूजासामग्री। इत्यमरभरतौ॥ (यथा, मार्कण्डेये। ९३। ८।

"ददतुस्तौ बलिञ्चैव निजगात्रासृगुक्षितौ॥")

चामरदण्डः। बलिवैश्वनामकपञ्चमहायज्ञान्तर्गतभूतयज्ञः। इति हेमचन्द्रः। ३। ४८६॥ (गृहस्थो हि पञ्चसूनापापेन प्रतिदिनं संबध्यते। तन्निष्कृत्यर्थं प्रत्यहं पञ्च महायज्ञाः कर्त्तव्याः। यथाह मनुः। ३। ६८—७१।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च कॢप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते॥"

"पशुवधस्थानं सूना। सूना इव सूना हिंसास्थानगुणयोगात्। चुल्ल्यादयः पञ्च गृहस्थस्य जीवहिंसास्थानानि। चुल्ली उद्धाहनी। पेषणी दृषदुपलात्मिका। उपस्करः गृहोपकरणकुण्डसंमार्जन्यादिः। कण्डनी उदूखलमूषले। उदकुम्भो जलाधारकलशः।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ गृहस्थानां बलिरूपभूतयज्ञस्य प्रतिदिनकर्त्तव्यतया तस्य विस्तृतिरुच्यते। गृहस्थः अनन्यचित्तो देवताध्यानपर एव होमान् कृत्वा प्राच्यादिषु दिक्षु बलिं हरेत्। तत्प्रकरणमाह। प्राच्यां इन्द्राय नमः। इन्द्र-